**M.A. 4th Semester Examination, 2021**
**SANSKRIT**
**(Karmakāṇḍa & Jňānakāṇḍa)**
**Paper: SNSK 404EA**
**Course ID: 40954**

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answer in their own words as far as practicable.*

## Unit – I

**(*मीमांसान्यायप्रकाशे प्रश्नाः*)**

1. **अधोनिर्दिष्टेषु त्रयः समाधेयाः।** **5× 3 = 15**

क) मीमांसान्यायप्रकाशस्य मङ्गलश्लोकद्वयं व्याख्यायताम्।
ख) "सोमेन यजेत" इत्यत्र मत्वर्थलक्षणां वर्णयत।
ग) "पुरुषप्रवृत्त्यनुकूलो भावकव्यापारविशेषः" इति यथाग्रन्थं वैशद्येन विवेचयत।
घ) विनियोगविधिः सोदाहरणं निरूप्यताम्।
ङ) अङ्गत्वबोधने श्रुतिप्रमाणस्य महत्त्वम् आलोच्यताम्।

2. **अधोनिर्दिष्टेषु पञ्च समाधेयाः।** **2× 5 = 10**

क) भावनायाः सामान्यलक्षणं भेदश्च निरूप्यताम्।
ख) "विरुद्धत्रिकद्वयम्" इत्यनेन केषां ग्रहणम्?
ग) अनुवादे मत्वर्थलक्षणायाः शङ्कायां तन्त्रवार्त्तिककारस्य वचनं लिख्यताम्।
घ) विध्यादिभेदेन वेदस्य कति भेदाः? के च ते?
ङ) निरपेक्षो रवः कः? तस्य भेदाः लिख्यन्ताम्।
च) वाजपेयाधिकरणे को विषय आलोच्यते? तत्र धात्वर्थस्य करणत्वेन अन्वये कः शाब्दबोधो भवति?
छ) सोदाहरणम् उत्पत्तिविधेः लक्षणं प्रतिपाद्यताम्।

## Unit – II

**(*कठोपनिषदि प्रश्नाः*)**

3. **एकः समाधेयः।** **10 × 1 = 10**

क) यमेन प्रदत्तान् वरान् विवृणुत।
ख) आत्मनो गुहाप्रवेशश्रुतिं समुल्लिख्य सम्यग् व्याख्यानं कुरुत।
ग) आख्यायिकारूपेण आत्मतत्त्वावबोधने कठोपनिषदः माहात्म्यम् आलोच्यताम्।

4. **एकं व्याख्यात।** **5× 1 = 5**

क) त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्मकृत्तरति जन्ममृत्यू।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति॥

ख) न जायते म्रियते वा विपश्चिन्-
नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥